॥ श्री जानकीवल्लभो विजयते ॥

श्रीरामप्रपत्तिः

— श्रीमद् अग्रदेवाचार्य विरचिता —

स्वामिन् ते शेषभूतोऽहं भोग्यस्ते रक्ष्य एव च ।
अकिञ्चनोऽनन्योपायस्त्वत्कैङ्कर्यैकभोग्यकः ॥ १॥

अगतिश्चानुकूलोऽहं प्रातिकूल्येन वर्जितः ।
रक्षिष्यतीति विश्वासी स्वरक्षाप्रार्थनायुतः ॥ २॥

कृपणोऽहं दयासिन्धो सर्वपापकरस्तथा ।
स्वञ्च स्वीयञ्च यत्किञ्चित् त्वयि न्यस्यामि स्वीकुरु ॥ ३॥

न्यस्याम्यकिञ्चनः श्रीमन्नात्मरक्षाभरं त्वयि ।
त्वत्प्राप्तौ मे उपायस्त्वं कृपया भव राघव ॥ ४॥

एतच्चराचरं सर्वं यच्च यावच्च श्रूयते ।
सर्वमस्ति त्वदीयं हि श्रुतिभिश्चावगम्यते ॥ ५॥

न तादृशं दृढं ज्ञानं मयि स्वामिन् प्रतिष्ठितम् ।
त्वं तु सर्वं विजानासि सर्वं वस्तु ममेति च ॥ ६॥

संसारसागरे भूमन् तत् त्वद्वस्तुनिमज्जितम् ।
पश्यसि त्वं समर्थः सन् कारणं किं वद प्रभो ॥ ७॥

चेतनाचेतनं सर्वं मदीयं सत्यमस्ति वै ।
जीवोऽप्यसौ मदीयश्चेत्यभिमानान्निमज्जते ॥ ८॥

यावत्स्वत्वाभिमानोऽस्य तावत्संसारसागरे ।
निमज्जितोऽभिमानान्ते द्युद्धरिष्यामि चेद्वद ॥ ९॥

सत्यमहं मदीयश्च सर्वमन्यत्तवास्ति वै ।
तथाप्येषोऽभिमानो मे हेतुस्तव नियोजनम् ॥ १०॥

अहं मदीयञ्चेत्येषो योऽभिमानो दुरत्ययः ।
त्वयि न्यस्यामि तं स्वामिन् त्वदीयं तं हि स्वीकुरु ॥ ११॥

निर्हेतुकृपया सर्वं स्वीकृत्य करुणानिधे ।
अहं ममाभिमानं मे निखिलं छिन्धि मूलतः ॥ १२॥

यदि नास्त्यानुकुल्यादिर्मयि स्वामिन् यथार्थतः ।
बद्धाञ्जलिपुटं दीनं रक्ष मां शरणागतम् ॥ १३॥

यथाहं च मदीयञ्च न मे रामस्य तत्त्वतः ।
भाति मे हृदये सम्यक् तथा कुरु दयानिधे ॥ १४॥

त्वन्मायया मलीमसं हृदयं निर्मलं कुरु ।
येनाऽहं संविजानामि त्वां त्वदीयश्च तत्त्वतः ॥ १५॥

त्वत्कृपादृष्टिमात्रेण तद्धि सर्वं भविष्यति ।
न वै परिश्रमः कश्चित् तव तत्र दयानिधे ॥ १६॥

प्रार्थयामि महादीनो दीनोद्धार कृपानिधे ।
एतद्देहावसाने मां स्वं प्रापय दयाकर ! ॥ १७॥

स्वदत्तज्ञानदीपेन नाशयाज्ञानजं तमः ।
स्वतत्त्वज्ञानपूर्वं मां स्वार्थं स्वमर्पय स्वयम् ॥ १८॥

यानि सञ्चितपापानि तानि नाशय मे प्रभो ।
अकृत्येषु प्रवृत्तिं मे वारय बुद्धिप्रेरक ॥ १९॥

यथा निर्मुच्य पापेभ्यस्त्वत्प्राप्तेर्योग्यता भवेत् ।
मयि स्वामिन् हरे राम तथा त्वं मां स्वयं कुरु ॥ २०॥

न मे पापविनिर्मोके नापि त्वत्प्राप्तिसाधने ।
शक्तिस्तत्र समर्थत्वं स्वप्राप्तेः साधनं भव ॥ २१॥

स्वाग्रे मां पतितं दृष्ट्वा श्रुत्वा च प्रार्थनामिमाम् ।
अङ्गीचकार श्रीरामस्तदप्यस्मीह निर्भरः ॥ २२॥

— इति श्री अग्रदेवाचार्यकृता श्रीरामप्रपत्तिः समाप्त ॥